# पाठ – 8

# संसारसागरस्य नायका:

**अभ्यास:**

**Q1. एकपदेन उत्तरत-**
**(क) कस्य राज्यस्य भागेषु गजधर: शब्द: प्रयुज्यते?**
**(ख) गजपरिमाणं क: धारयति?**
**(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य गजधरेभ्य: किं प्रदीयते स्म?**
**(घ) के शिल्पिरूपेण न समादृता: भवन्ति?**

**Answer.** (क) राजस्थानस्य।

(ख) गजधर:।

(ग) सम्मानमपि।

(घ) गजधरा:।

**Q2. अधोलिखितानां प्रश्नानामुत्तराणि लिखत-**
**(क) तडागा: कुत्र निर्मीयन्ते स्म?**
**(ख) गजधरा: कस्मिन् रूपे परिचिता:?**
**(ग) गजधरा: किं कुर्वन्ति स्म?**
**(घ) के सम्माननीया: ?**

**Answer.** (क) तडागा: सम्पूर्ण देशे निर्मीयन्ते स्म।

(ख) गजधरा: वास्तुकारणां रूपे परिचिता:।

(ग) गजधरा: नगरनियोजनात् लघुनिर्माण पर्यन्तं सर्वाणि कार्याणि कुर्वन्ति स्म।

(घ) गजधरा: सम्माननीया:।

**Q3. रेखाङ्कितानि पदानि आधृत्य प्रश्न-निर्माणं कुरुत-**
**(क) सुरक्षाप्रबन्धनस्य दायित्वं गजधरा: निभालयन्ति स्म।**
**(ख) तेषां स्वामिन: असमर्था: सन्ति।**
**(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य सम्मानमपि प्राप्नुवन्ति।**

**(घ) <u>गजधर:</u> सुन्दर: शब्द: अस्ति।**
**(ङ) <u>तडागा:</u> संसारसागरा: कथ्यन्ते।**

**Answer.** (क) कस्य दायित्वं गजधरा: निभालयन्ति स्म?
(ख) केषां स्वामिन: असमर्था: सन्ति?
(ग) कार्यसमाप्तौ कानि अतिरिच्य सम्मानमपि प्राप्नुवन्ति?
(घ) के सुन्दर: शब्द: अस्ति?
(ङ) का: संसारसागरा: कथ्यन्ते?

**Q4. अधोलिखितेषु यथापेक्षितं सन्धिं/विच्छेदं कुरुत-**

| | | | | | |
|---|---|---|---|---|---|
| (क) | अद्य | + | अपि | = | ____________। |
| (ख) | ____________ | + | ____________ | = | स्मरणार्थम्। |
| (ग) | इति | + | अस्मिन् | = | ____________। |
| (घ) | ____________ | + | ____________ | = | एतेष्वेव। |
| (ङ) | सहसा | + | एव | = | ____________। |

**Answer.**

| | | | | | |
|---|---|---|---|---|---|
| (क) | अद्य | + | अपि | = | <u>अद्यापि</u>। |
| (ख) | <u>स्मरण</u> | + | <u>अर्थम्</u> | = | स्मरणार्थम्। |
| (ग) | इति | + | अस्मिन् | = | <u>इत्यस्मिन्</u>। |
| (घ) | <u>एतेषु</u> | + | <u>एव</u> | = | एतेष्वेव। |
| (ङ) | सहसा | + | एव | = | <u>सहसैव</u> |

**Q5. मञ्जूषात: समुचितानि पदानि चित्वा रिक्तस्थानानि पूरयत- रचयन्ति ,गृहीत्वा, सहसा, जिज्ञासा ,सह**

**(क) छात्रा: पुस्तकानि ____________ विद्यालयं गच्छन्ति।**

**(ख) मालाकारा: पुष्पै: माला: ____________।**

**(ग) मम मनसि एका —————— वर्तते।**

**(घ) रमेशः मित्रैः —————— विद्यालयं गच्छति।**

**(ङ) —————— बालिका तत्र अहसत।**

**Answer.** (क) छात्राः पुस्तकानि गृहीत्वा विद्यालयं गच्छन्ति।

(ख) मालाकाराः पुष्पैः मालाः रचयन्ति।

(ग) मम मनसि एका जिज्ञासा वर्तते।

(घ) रमेशः मित्रैः सह विद्यालयं गच्छति।

(ङ) सहसा बालिका तत्र अहसत।

**Q6. पदनिर्माणं कुरुत-**

| | धातुः | | प्रत्ययः | | पदम् |
|---|---|---|---|---|---|
| यथा | कृ | + | तुमुन् | = | कर्तुम् |
| | हृ | + | तुमुन् | = | -------------------- |
| | तॄ | + | तुमुन् | = | -------------------- |
| यथा | नम् | + | क्त्वा | = | नत्वा |
| | गम् | + | क्त्वा | = | -------------------- |
| | त्यज् | + | क्त्वा | = | -------------------- |
| | भुज् | + | क्त्वा | = | -------------------- |

| | उपसर्गः | धातुः | प्रत्ययः | | पदम् |
|---|---|---|---|---|---|
| यथा | उप | गम् | ल्यप् | = | उपगम्य |
| | सम् | पूज् | ल्यप् | = | -------------------- |
| | आ | नी | ल्यप् | = | -------------------- |
| | पर | दा | ल्यप् | = | -------------------- |

**Answer.**

| | धातुः | | प्रत्ययः | | पदम् |
|---|---|---|---|---|---|
| यथा | कृ | + | तुमुन् | = | कर्तुम् |
| | हृ | + | तुमुन् | = | हर्तुम् |
| | तृ | + | तुमुन् | = | तर्तुम् |
| यथा | नम् | + | क्त्वा | = | नत्वा |
| | गम् | + | क्त्वा | = | गत्वा |
| | त्यज् | + | क्त्वा | = | त्यक्त्वा |
| | भुज् | + | क्त्वा | = | भुक्त्वा |

| | उपसर्गः | धातुः | प्रत्ययः | | पदम् |
|---|---|---|---|---|---|
| यथा | उप | गम् | ल्यप् | = | उपगम्य |
| | सम् | पूज् | ल्यप् | = | सम्पूज्य |
| | आ | नी | ल्यप् | = | आनीय |
| | प्र | दा | ल्यप् | = | प्रदाय |

**Q7. कोष्ठकेषु दत्तेषु शब्देषु समुचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-**

**यथा- विद्यालयं परितः वृक्षाः सन्ति। (विद्यालय)**

**(क) —————— उभयत: ग्रामा: सन्ति। (ग्राम)**
**(ख) —————— सर्वत: अट्टालिका: सन्ति। (नगर)**
**(ग) धिक् ——————। (कापुरुष)**

**यथा- मृगा: मृगै: सह धावन्ति। (मृग)**
**(क) बालका: —————— सह पठन्ति। (बालिका)**
**(ख) पुत्र —————— सह आपणं गच्छति। (पितृ)**
**(ग) शिशु: —————— सह क्रीडति। (मातृ)**

**Answer.** यथा- विद्यालयं परित: वृक्षा: सन्ति। (विद्यालय)
(क) ग्रामम् उभयत: ग्रामा: सन्ति। (ग्राम)
(ख) नगरम् सर्वत: अट्टालिका: सन्ति। (नगर)
(ग) धिक् कापुरुषम्। (कापुरुष)

यथा- मृगा: मृगै: सह धावन्ति। (मृग)
(क) बालका: बालिकाभि: सह पठन्ति। (बालिका)
(ख) पुत्र पित्रा सह आपणं गच्छति। (पितृ)
(ग) शिशु: मात्रा सह क्रीडति। (मातृ)